# ३१ एकत्रिंश दशकः - भ्रामर्यवतारः

कश्चित्पुरा मन्त्र मुदीर्य गायत्रि इति प्रसिद्धं दितिजोऽरुणाख्यः ।
चिराय कृत्वा तप आत्मयोनेः प्रसादितादाप वरानपूर्वान् ॥ ३१-१॥

स्त्रीपुम्भिर स्त्रैश्च रणे द्विपादैः चतुष्पदैश्चा प्युभयात्मकैश्च ।
अवध्यतां देव पराजयं च लब्ध्वा स दृप्तो दिव माससाद ॥ ३१-२॥

रणे जिता दैत्यभयेन लोक-पालैः सह स्वस्व पदानि हित्वा ।
देवा द्रुताः प्राप्य शिवं रिपूणां संयग्वधोपाय मचिन्तयंश्च ॥ ३१-३॥

तदाऽभवत्का प्यशरीरिणी वाक् भजेत देवीं शुभमेव वः स्यात् ।
दैत्योऽरुणो वर्धयतीह गायत्रि उपासने नात्मबलं त्वधृष्यम् ॥ ३१-४॥

यद्येष तं मन्त्रजपं जहाति स दुर्बलः साध्य वधोऽपि च स्यात् ।
एवं निशम्य त्रिदशैः प्रहृष्टैः अभ्यर्थितो देवगुरुः प्रतस्थे ॥ ३१-५॥

स प्राप दैत्यं यतिरूपधारी प्रत्युद्गतो मन्त्रजपाति सक्तम् ।
स्मितार्द्र मूचे कुशली सबन्धु-मित्रो भवान् किं जगदेकवीर ॥ ३१-६॥

दैत्यस्य ते मन्त्रजपेन किं यो नूनं बलिष्ठं त्वबलं करोति ।
येनैव देवा अबला रणेषु त्वया जितास्त्वं स्वहितं कुरुष्व ॥ ३१-७॥

संन्यासिनो मन्त्रजपेन राग-द्वेषादि जेतुं सततं यतन्ते ।
न त्वं यतिर्नापि मुमुक्षुरर्थ कामातिसक्तस्य जपेन किं ते ॥ ३१-८॥

एकं हि मन्त्रं समुपास्वहे द्वौ तेनासि मित्रं मम तद्वदामि ।
मन्त्रश्च मे मुक्तिद एव तुभ्यं वृद्धिं न दद्यादय मित्यवेहि ॥ ३१-९॥

बृहस्पतावेव मुदीर्य याते सत्यं तदुक्तं दितिजो विचिन्त्य ।
क्रमाज्जहौ मन्त्रजपं सदा हि मूढः परप्रोक्त विनेयबुद्धिः ॥ ३१-१०॥

एवं गुरौ कुर्वति दैत्यभीतैः कृत्वा तपोयोग जपाध्वरादि ।
जाम्बूनदेश्वर्यमरैः स्तुता त्वं प्रसादिता प्रादुरभूः कृपार्द्रा ॥ ३१-११॥

त्वद्देहजातै र्भ्रमरै रनन्तैः दैत्यः ससैन्यो विफलास्त्र शस्त्रः ।
दष्टो हतस्त्वं च नुति प्रसन्ना पश्यत्सु देवेषु तिरोहिताऽभूः ॥ ३१-१२॥

स्वदेहतो वै भ्रमरान् विधात्री त्वं भ्रामरीति प्रथिता जगत्सु ।
अहो विचित्रा स्तव देवि लीलाः नमो नमस्ते भुवनेशि मातः ॥ ३१-१३॥